## आकर्षात् ष्ठल्। (९/१५५७)

आकर्षशब्दाद् ष्ठल् प्रत्ययो भवति चरति इत्येतस्मिन्नर्थे[1]। ठकोऽपवादः। लकारः स्वरार्थः। षकारो [2]ङीषर्थः। आकर्षेण चरति आकर्षिकः। आकर्षिकी[3]। आकर्षः इति सुवर्णपरीक्षार्थो निकषोपलः उच्यते ॥

## पर्पादिभ्यः ष्ठन्। (१०/१५५८)

[4]पर्प इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति चरति इत्येतस्मिन्नर्थे। ठकोऽपवादः। नकारः स्वरार्थः। षकारो ङीषर्थः। [5]पर्पिकः। पर्पिकी। अश्विकः। अश्विकी[6]।

पर्प। अश्व। अश्वत्थ। रथ। जाल। [7]न्यास। व्याल। पाद। पञ्च। पदिक। पर्पादिः ॥

## श्वगणाट् ठञ्च। (११/१५५९)

श्वगणशब्दात् ठञ् प्रत्ययो भवति, चकारात् ष्ठन्, चरति इत्येतस्मिन्नर्थे। ठकोऽपवादः। श्वगणेन चरति श्वागणिकः। श्वागणिकी। ठन् – श्वगणिकः। श्वगणिका।

'श्वादेरिञि' (७.३.८/१५६०) इत्यत्र वक्ष्यति, 'इकारादिग्रहणं [8]च कर्तव्यम् श्वागणिकाद्यर्थम्' (७.३.८/१५६० वा.) इति। तेन ठञि द्वारादिकार्यं न भवति ॥

## वेतनादिभ्यो जीवति। (१२/१५६२)

तेन [9]इति तृतीयासमर्थेभ्यः वेतनादिभ्यः शब्देभ्यः जीवति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। वेतनेन जीवति वैतनिकः [10]कर्मकरः[11]। धनुर्दण्डग्रहणमत्र[12] सङ्घातविगृहीतार्थम्। धानुर्दण्डिकः। धानुष्कः। दाण्डिकः।

वेतन। वाह। अर्धवाह। धनुर्दण्ड[13]। जाल। [14]वेस। उपवेस। प्रेषण। [15]उपस्ति। सुख। शय्या। शक्ति। उपनिषत्। उपवेष। [16]स्रक्। पाद। उपस्थान। वेतनादिः ॥

## वस्नक्रयविक्रयाट्ठन्। (१३/१५६३)

वस्नक्रयविक्रयशब्दाभ्यां[17] तृतीयासमर्थाभ्यां ठन् प्रत्ययो भवति जीवति इत्येतस्मिन्[18]विषये। [19]ठकोऽपवादः। [22]वस्नेन जीवति [21]वस्निकः। क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम्। क्रयविक्रयिकः। [23]क्रयिकः। विक्रयिकः ॥

---

1. तृतीयासमर्थात् इत्यधिकम् फ, तेन इति तृतीयासमर्थात् इत्यधिकम् ड. 2. ङीबर्थः क. 3. स्त्री इत्यधिकम् ह. 4. पर्पादिभ्यः क. 5. पर्पिकः पर्पिकी क, नास्ति फ. 6. अश्वत्थिकः अश्वत्थिकी इत्यधिकम् ह. 7. त्यास व. 8. च कर्तव्यम् नास्ति ड. 9. इत्येव फ. 10. कार्मारकः। वाहिकः ह. 11. वाहिकः आर्धवाहिकः इत्यधिकम् फ. 12. पठ्यते इत्यधिकम् ह. 13. उपदेश स्फिक इत्यधिकम् ड. 14. वेश उपवेश ड. 15. उपस्थित मुख ड. 16. सिक्त ब. 17. तेन इति इत्यधिकम् ड. 18. अर्थे ब. 19. ठकोऽपवादः नास्ति फ. 20. वस्तेन वस्तिकः ब. 21. वस्निका ह. 22. क्रयेण जीवति इत्यधिकम् ड.